# শ্রীবিনাযকস্তোত্রম্

{॥ শ্রীবিনাযকস্তোত্রম্ ॥}

ॐ

মূষিকবাহন মোদকহস্ত চামরকর্ণ বিলম্বিতসূত্র ।

বামনরূপ মহেশ্বরপুত্র বিঘ্নবিনাযক পাদ নমস্তে ॥

দেবদেবসুতং দেবং জগদ্বিঘ্নবিনাযকম্ ।

হস্তিরূপং মহাকাযং সূর্যকোটিসমপ্রভম্ ॥ ১॥

বামনং জটিলং কান্তং হ্রস্বগ্রীবং মহোদরম্ ।

ধূম্রসিন্দূরযুদ্গণ্ডং বিকটং প্রকটোৎকটম্ ॥ ২॥

একদন্তং প্রলম্বোষ্ঠং নাগযজ্ঞোপবীতিনম্ ।

ত্র্যক্ষং গজমুখং কৃষ্ণং সুকৃতং রক্তবাসসম্ ॥ ৩॥

দন্তপাণিং চ বরদং ব্রহ্মণ্যং ব্রহ্মচারিণম্ ।

পুণ্যং গণপতিং দিব্যং বিঘ্নরাজং নমাম্যহম্ ॥ ৪॥

দেবং গণপতিং নাথং বিশ্বস্যাগ্রে তু গামিনম্ ।

দেবানামধিকং শ্রেষ্ঠং নাযকং সুবিনাযকম্ ॥ ৫॥

Stotram Digitalized By Sanskritdocuments.org

নমামি ভগবং দেবং অদ্ভুতং গণনাযকম্ ।

বক্রতুণ্ড প্রচণ্ডায উগ্রতুণ্ডায তে নমঃ ॥ ৬॥

চণ্ডায গুরুচণ্ডায চণ্ডচণ্ডায তে নমঃ ।

মত্তোন্মত্তপ্রমত্তায নিত্যমত্তায তে নমঃ ॥ ৭॥

উমাসুতং নমস্যামি গঙ্গাপুত্রায তে নমঃ ।

ওঙ্কারায বষটকার স্বাহাকারায তে নমঃ ॥ ৮॥

মন্ত্রমূর্তে মহাযোগিন্ জাতবেদে নমো নমঃ ।

পরশুপাশকহস্তায গজহস্তায তে নমঃ ॥ ৯॥

মেঘায মেঘবর্ণায মেঘেশ্বর নমো নমঃ ।

ঘোরায ঘোররূপায ঘোরঘোরায তে নমঃ ॥ ১০॥

পুরাণপূর্বপূজ্যায পুরুষায নমো নমঃ ।

মদোৎকট নমস্তেঽস্তু নমস্তে চণ্ডবিক্রম ॥ ১১॥

বিনাযক নমস্তেঽস্তু নমস্তে ভক্তবৎসল ।

ভক্তপ্রিযায শান্তায মহাতেজস্বিনে নমঃ ॥ ১২॥

যজ্ঞায যজ্ঞহোত্রে চ যজ্ঞেশায নমো নমঃ ।

নমস্তে শুক্লভস্মাঙ্গ শুক্লমালাধরায চ ॥ ১৩॥

মদক্লিন্নকপোলায গণাধিপতযে নমঃ ।

রক্তপুষ্প প্রিযায চ রক্তচন্দন ভূষিত ॥ ১৪ ॥

অগ্নিহোত্রায শান্তায অপরাজয্য তে নমঃ ।

আখুবাহন দেবেশ একদন্তায তে নমঃ ॥ ১৫॥

শূর্পকর্ণায শূরায দীর্ঘদন্তায তে নমঃ ।

বিঘ্নং হরতু দেবেশ শিবপুত্রো বিনাযকঃ ॥ ১৬॥

ফলশ্রুতি

জপাদস্যৈব হোমাচ্চ সন্ধ্যোপাসনসত্তথা ।

বিপ্রো ভবতি বেদাঢ্যঃ ক্ষত্রিযো বিজযী ভবেত্ ॥

বৈশ্যো ধনসমৃদ্ধঃ স্যাত্ শূদ্রঃ পাপৈঃ প্রমুচ্যতে ।

গর্ভিণী জনযেৎপুত্রং কন্যা ভর্তারমাপ্নুযাত্ ॥

প্রবাসী লভতে স্থানং বদ্ধো বন্ধাত্ প্রমুচ্যতে ।

ইষ্টসিদ্ধিমবাপ্নোতি পুনাত্যাসত্তমং কুলং ॥

সর্বমঙ্গলমাঙ্গল্যং সর্বপাপপ্রণাশনম্ ।

সর্বকামপ্রদং পুংসাং পঠতাং শ্রুণুতামপি ॥

॥ ইতি শ্রীব্রহ্মাণ্ডপুরাণে স্কন্দপ্রোক্ত বিনায়কস্তোত্রং সম্পূর্ণম্ ॥

Encoded and proofread by M Suresh (msuresh at altavista.net)

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Vinayaka Stotram Lyrics in Bengali PDF
% File name : vinaayaka.itx
% Location : doc_ganesha
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : M Suresh msuresh at altavista.net
% Proofread by : M Suresh msuresh at altavista.net
% Description-comments : shrIbrahmANDapurANe skandaprokta
% Latest update : January 21, 1999
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website